# तृतीय उल्लासः

**अर्थाः प्रोक्ताः पुरा तेषाम् ...................... ।**

अर्थाः वाच्यलक्ष्यव्यङ्ग्याः । तेषां वाचकलाक्षणिकव्यञ्जकानाम् ॥

**.......................... अर्थव्यञ्जकतोच्यते ।**

कीदृशीत्याह-

कीदृशीत्याह-

वक्तृ-बोद्धव्य-काकूनां वाक्य-वाच्यान्यसन्निधेः ॥ २१ ॥
प्रस्ताव-देश-कालादेर्वैशिष्ट्यात्प्रतिभाजुषाम् ।
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ॥ २२ ॥

बोद्धव्यः प्रतिपाद्यः । काकुर्ध्वनेर्विकारः । प्रस्तावः प्रकरणम् ।अर्थस्य वाच्यलक्ष्यव्यङ्ग्यात्मनः ।

1. वक्तृवैशिष्ट्य
2. बोद्धव्यवैशिष्ट्य
3. काकूवैशिष्ट्य
4. वाक्यवैशिष्ट्य
5. वाच्यवैशिष्ट्य
6. अन्यसन्निधिवैशिष्ट्य
7. प्रस्ताववैशिष्ट्य
8. देशवैशिष्ट्य
9. कालवैशिष्ट्य
10. चेष्टादिवैशिष्ट्य

क्रमेणोदाहरणानि-

## वक्तृवैशिष्ट्यस्य उदाहरणम्

**अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि त्वरितम् ।**
**श्रमस्वेदसलिलनिःश्वासनिःसहा विश्राम्यामि क्षणम् ॥**

अत्र चौर्यरतह्नोपनं गम्यते ।

## बोद्धव्यवैशिष्ट्यस्य उदाहरणम्

**औन्निद्र्यं दौर्बल्यं चिन्तालसत्वं सनिःश्वसितम् ।**
**मम मन्दभागिन्याः कृते सखि त्वामपि अहह परिभवति ॥**

अत्र दूत्यास्तत्कामुकोपभोगो व्यज्यते ।

# काकुवैशिष्ट्यस्य उदाहरणम्

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥१५॥

(भट्टनारायण वेणीसंहार १.११)

अत्र मयि न योग्यः खेदः कुरुषु तु योग्य इति काक्वा प्रकाश्यते ।
न च वाच्यसिद्ध्यङ्गमत्र काकुरिति गुणीभूतव्यङ्ग्यत्वं शङ्क्यम् ।
प्रश्नमात्रेणापि काकोर्विश्रान्तेः ।

## वाक्यवैशिष्ट्यस्य उदाहरणम्

**तदा मम गण्डस्थलनिमग्नां दृष्टिं नानैषीरन्यत्र ।**
**इदानीं सैवाहं तौ च कपोलौ न च सा दृष्टिः ॥**

अत्र मत्सखीं कपोलप्रतिबिम्बितां पश्यतस्ते दृष्टिरन्यैवाभूत्। चलितायां तु तस्याम् अन्यैव जातेत्यहो प्रच्छन्नकामुकत्वं ते इति व्यज्यते ।

## वाच्यसन्निधिवैशिष्ट्यस्य उदाहरणम्

उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः ।
किञ्चैतस्मिन् सुरतसुहृदस्तन्वि ते वान्ति वाताः
येषामग्रे सरति कलिताऽकाण्डकोपो मनोभूः ॥१७॥

अत्र रतार्थं प्रविशेति व्यङ्ग्यम् ।

## अन्यसन्निधिवैशिष्ट्यस्य उदाहरणम्

**नुदत्यार्द्रमनाः श्वश्रूर्मां गृहभरे सकले ।**
**क्षणमात्रं यदि संध्यायां भवति न वा भवति विश्रामः ॥**

अत्र संध्या संकेतकाल इति तटस्थं प्रति कयाचिद्द्योत्यते ।

## प्रस्ताववैशिष्ट्यस्य उदाहरणम्

**श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण ।**
**एवमेव किमिति तिष्ठसि तत्सखि सज्जय करणीयम् ॥**

अत्रोपपतिं प्रत्यभिसर्तुं प्रस्तुता न युक्तमिति कयाचिन्निवार्यते ।

## देशवैशिष्ट्यस्य उदाहरणम्

**अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः ।**
**नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः ॥२० ॥**

अत्र विविक्तोऽयं देश इति प्रच्छन्नकामुकस्त्वयाभिसार्यतामिति आश्वस्तां प्रति कयाचिन्निवेद्यते ।

## कालवैशिष्ट्यस्य उदाहरणम्

**गुरुजनपरवश प्रिय किं भणामि तव मन्दभागिनी अहकम् ।**
**अद्य प्रवासं व्रजसि व्रज स्वयमेव श्रोष्यसि करणीयम् ॥**

अत्राद्य मधुसमये यदि व्रजसि तदाहं तावन्न भवामि
तव तु न जानामि गतिमिति व्यज्यते ।

आदिग्रहणाच्चेष्टादेः । तत्र चेष्टाया यथा-

**द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया**
**प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम् ।**
**आनीतं पुरतः शिरोंऽशुकमधः क्षिप्ते चले लोचने**
**वाचस्तत्र निवारितं प्रसरणं संकोचिते दोर्लते ॥२२॥**

अत्र चेष्टया प्रच्छन्नकान्तविषय आकूतविशेषो ध्वन्यते, निराकाङ्क्षप्रतिपत्तये प्राप्तावसरतया च पुनः पुनरुदाह्रियते, वक्त्रादीनां मिथःसंयोगे द्विकादिभेदेन ।

अनेन क्रमेण लक्ष्यव्यङ्ग्ययोश्च व्यञ्जकत्वमुदाहार्यम् ॥२१२२॥

**शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः ।**
**अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता ॥ २३ ॥**

शब्देति । नहि प्रमाणान्तरवेद्योऽर्थो व्यञ्जकः ॥२३ ॥

इति श्रीकाव्यप्रकाशेऽर्थव्यञ्जकतानिर्णयो नाम तृतीय उल्लासः ॥३ ॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ।।

# धन्यवादाः